पैठीनसिः ।
"पैतृके विभज्यमाने दायाद्ये समो विभागः ॥"
नारदः ।
"शौर्य्यभार्य्याधने हित्वा यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥"
इति दायभागः ॥

पैतृकभूमिः, स्त्री, ( पैतृकी पितृसम्बन्धिनी भूमिः । ) पितृसम्बन्धिस्थानम् । तस्या माहात्म्यं यथा,—
श्रीभगवानुवाच ।
"भवांश्च यादवैः सार्द्धं प्रविश्य द्वारकापुरीम् ।
मत्पित्रा मातृभिः सार्द्धं माहेन्द्रे च यथो नृप ! ॥
उग्रसेन उवाच ।
वासुदेव न यास्यामि भूमिं तां पैतृकीं पुनः ।
सर्व्वतीर्थपरां शुद्धां दैवे कर्म्मणि पैतृके ॥
पारक्ये भूमिदेशे च पितॄणां निर्व्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म निहन्यते ॥
पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम् ।
किञ्चित्फलप्रदञ्चैव सम्पूर्णं पैतृके स्थले ॥
पुत्त्रपौत्त्रकलत्त्रेभ्यः प्राणेभ्यः प्रेयसी सदा ।
दुर्लभा पैतृकी भूमिः पितुर्मातुर्गरीयसी ॥
तत् शस्यञ्च पवित्रञ्च दैवे कर्म्मणि पैतृके ।
क्रीतञ्च लभ्यते दानं परदत्तमशुद्धकम् ॥
म्रियते पैतृकीभूम्यां तीर्थतुल्यफलं लभेत् ।
गङ्गाजलसमं पूतं पितृखातोदकं हरे ॥
तत्र स्नात्वा जडे पूते गङ्गास्नानफलं लभेत् ।
पितॄणां तर्पणं तत्र पवित्रं देवपूजनम् ॥
पैतृकी जन्मभूमिश्चेत् फलं तद्द्विगुणं लभेत् ।
पैतृकीभूमितुल्या च दानभूमिः सतामपि ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥

पैतृष्वसेयः, पुं, स्त्री, ( पितृष्वसुरपत्यमिति । पितृष्वसृ+"ढकि लोपः ।" ४ । १ । १३३ । इति ज्ञापकत्वात् ढक् अन्तलोपश्च । ) पितृभगिनीपुत्त्रः । इत्यमरः । २ । ६ । २५ ॥ पिस्तुतभाइ इति भाषा ॥ ( स्त्रियां ङीप् । पितृभगिनीपुत्त्री । यथा, मनुः । ११ । १७२ ।
"पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रयणञ्चरेत् ॥" )

पैतृष्वस्रीयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति । "पितृष्वसुश्छण् ।" ४ । १ । १३२ । इति छण् । ) पितृभगिनीपुत्त्रः । इत्यमरः । २ । ६ । २५ ॥ पिषतुत भाइ इति भाषा ॥

पैत्तः, त्रि, ( पित्तात् आगतं पित्तस्य शमनं कोपनं वेति । पित्त+अण् । ) पित्तजव्याधिः । इति राजनिर्घण्टः ॥ ( यथा, माधवनिदाने गुल्माधिकारे ।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताशसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥" )

पैत्तिकः, त्रि, ( पित्तेन निर्वृत्त इति । पित्त+ठञ् । ) पित्तजव्याधिः । इति राजनिर्घण्टः ॥ (यथा, चरके चिकित्सास्थाने २२ अध्याये ।
"प्रततं कासमानश्च ज्योतींषीव च पश्यति ।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके ॥" )

पैत्रं, क्ली, ( पितुरिदमिति । पितृ+अण् ) पितृतीर्थम् । अङ्गुष्ठतर्ज्जन्योर्मध्यम् । इत्यमरः । २ । ७ । ५१ ॥ पितृसम्बन्धिनि, त्रि । ( यथा, महाभारते । ७ । १६६ । ७१ ।
"ऐन्द्रं याम्यं वारुणं वैत्तपाल्यं
पैत्रं त्वाष्ट्रं कर्म्म सौम्यञ्च तुभ्यम् ।
रूपं ज्योतिः शब्दमाकाशवायुः
स्पर्शः स्वाद्यं सलिलं गन्ध उर्व्वी ॥" )

पैत्राहोरात्रः, पुं, ( पैत्रः अहोरात्रः । ) पितृलोकस्य दिवारात्रिः । स तु मनुष्यमाने मासेकेन भवति । यथा —
"मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ॥"
इत्यमरः । १ । ४ । २१ ॥

पैलः, पुं, ( पीलाया अपत्यमिति । पीला+"पीलाया वा ।" ४ । १ । ११८ । इति अण् ।) मुनिविशेषः । स च ऋग्वेदी यथा,—
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥
अथर्व्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ।
इतिहासपुराणानां पिता मे रोमहर्षणः ॥"
इति श्रीभागवते १ स्कन्धे ४ अध्यायः ॥

पैशाचः, पुं, ( पिशाचस्यायमिति । पिशाच+अण् । ) अष्टप्रकारविवाहान्तर्गताष्टमविवाहः । यथा याज्ञवल्क्यः । "पैशाचः कन्यका छलात् ।" छलमाह मनुः । ३ । ३४ ।
"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥"
इत्युद्वाहतत्त्वम् ॥
पिशाचसम्बन्धिनि, त्रि ॥ ( राजसकायान्तर्गतकायविशेषः । तल्लक्षणं यथा,—
"उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा ।
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचकायलक्षणम् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥ )

पैशुन्यं, क्ली, ( पिशुनस्य भावः । पिशुन+ब्राह्मणादित्वात् ष्यञ् । ) पिशुनता । खलता । तच्च दशविधपापान्तर्गतवाङ्मयपापविशेषः । इति तिथितत्त्वम् ॥ यथा,—
"पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥")
इति मनौ । ६ । ४८ ॥
अस्य विवरणं पातकशब्दे द्रष्टव्यम् ॥

पैष्टः, त्रि, ( पिष्टस्येदमिति । पिष्ट+अण् । ) पिष्टसम्बन्धी । यथा,—
"यद्यपदन्तकः पूषा पैष्टमत्ति सदा चरुम् ।
अग्नीन्द्रेश्वरसामान्यात्तण्डुलोऽत्र विधीयते ॥"
इति तिथ्यादितत्त्वम् ॥

पैष्टिकं, क्ली, ( पिष्ट+ठञ् । ) पिष्टानां समूहः । इति आपूपिकशब्दटीकायां भरतः ॥ मद्यविशेषः । यथा । रूक्षमाध्वीकादिजनिते मदात्यये स्निग्धपैष्टिकादि मृदु मद्यं हेतुविपरीतमेव ॥ इति विजयरक्षितः ॥ ( यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"पालला: श्लेष्मजननाः शष्कुल्यः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ॥")

पैष्टी, स्त्री, ( पिष्टेन निर्वृत्तेति । पिष्ट+अण्+ङीप् । ) विविधधान्यविकारजा मदिरा । तस्या गुणाः ।
"पैष्टी कट्वम्लतीक्ष्णा स्वादीषद्गौडीसमापरा ।
वातहृत् कफकृत्क्षीणपित्तकृन्मोहनी च सा ॥"
इति राजनिर्घण्टः ॥
(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये ।
"गौड़ी माध्वी तथा पैष्टी निर्यासा कथितापरा ।
इति चतुर्व्विधा ज्ञेयाः सुरास्तासां प्रभेदकाः ॥"
"पैष्टी सन्दीपनी रुच्या कफमन्दानलनाशिनी ।
पित्तला पाण्डुरोगाणां कारिणी बहुधा मता ॥" )

पोगण्डः, पुं, ( पुनातीति । पू+क्विप् । पौः शुद्धो गण्डो यस्य । ) दशवर्षीयबालकः । यथा,—
"रोगी वृद्धस्तु पोगण्डः कुर्व्वन्त्यन्यैर्व्रतं सदा ॥"
इति प्रायश्चित्ततत्त्वे ब्रह्मपुराणम् ॥

पोगण्डः, त्रि, ( पौः गण्ड एकदेशोऽस्य । ) अपोगण्डः । स्वभावतो न्यूनाधिकाङ्गः । ऊनविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादिजनः । यथा । पोगण्डो विकलाङ्गे स्यादिति हलायुधः । पोगण्डो विकलाङ्गकः । इति रत्नकोषः । इत्यमरटीकायां भरतः ॥

पोटः, पुं, ( पुटत्यत्रेति । पुट संश्लेषे+आधारे घञ् । ) वेश्मभूमिः । इति जटाधरः ॥ ( पुट-श्लेषे+भावे घञ् । ) संश्लेषः । इति पोटगलशब्दटीकायां भरतः ॥

पोटगलः, पुं, ( पोटेन संश्लेषेण गलतीति । गल+अच् । ) नलः । काशः । इत्यमरः ।२।४।१६२ ॥ ( अस्य पर्य्यायो यथा,—
"पोटगलो हस्तकाशः काकेक्षुः स च खड़्गकः ॥"
इति वैद्यकरत्नमालायाम् ॥ )
मत्स्यः । इति मेदिनी । ले, १५७ ॥ (सर्पजात्यन्तर्गतवैकरञ्जसर्पप्रभेदः ॥ "राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥ )

पोटलिका, स्त्री, ( पोटेन संश्लेषेण लीयते इति । ली+डः । ततः स्वार्थे कन् टाप् अत इत्वञ्च । ) संश्लिष्टवस्त्रादि । इति केचित् ॥ पुँटुलि इति भाषा ॥

पोटा, स्त्री, (पुटति स्त्रीपुरुषस्वरूपं संश्लिष्यतीति । पुट+अच् । टाप् च । ) स्त्रीपुंसलक्षणा । इत्यमरः । २ । ६ । १५ ॥ स्त्रीपुंसयोर्लक्षणं चिह्नं स्तनश्मश्र्वादिरूपं यस्यां सा । इति भरतः ॥